# DAV NUPPL Public School

## NUPPL Township, Ghatampur, Kanpur Nagar, UP-209206

**Assignment: Half yearly** **Class : IX** **Subject: Sanskrit**

अपठित - भाग:

भारतवर्षः अस्माकं देशः अस्ति। भारते सर्वत्र विविधता अस्ति। यथा-अत्र जनानां विविधाः सम्प्रदायाः, विविधाः भाषाः, विविधाः वेशभूषाः च सन्ति । परम् अनेकतायाम् अपि एकतायाः मधुरा धारा प्रवहति। अस्मिन् देशे सर्वे ऋतवः क्रमेण आगच्छन्ति। ते वसन्तः, ग्रीष्मः, वर्षा, शरद, हेमन्तः, शिशिरः च सन्ति । अत्र सर्वे भाषा-भाषिण: एकं राष्ट्रध्वजं नमन्ति एकं च राष्ट्रगानं गायन्ति । राष्ट्रीय-उत्सवान सामाजिक उत्सवान् च मिलित्वा मानयन्ति। "प्रायः जनाः उत्सवेषु धार्मिक-कार्येषु च संस्कृतभाषायां मन्त्रोच्चारणं कुर्वन्ति । यतः सर्व-संस्काराणां जननी संस्कृत-भाषा एव अस्ति। अतः कथ्यते- 'भारतीया संस्कृतिः संस्कृते एव निहिता अस्ति ।''

प्रश्न : 1. अपठित-गद्यांशं ध्यानेन पठित्वा समुचितोत्तराणि लिखन्तु।

एकपदेन उत्तरत

(i) भारते सर्वत्र का अस्ति ?

(ii) केषां जननी संस्कृतभाषा अस्ति ?

(iii) भारतीया संस्कृतिः कुत्र निहिता अस्ति ?

पूर्णवाक्येन उत्तरत

(i) भारते सर्वे भाषा-भाषिणः किं कुर्वन्ति ?

(ii) अस्मिन् देशे के ऋतवः सन्ति ?

(iii) सर्वेजना: कान् मिलित्वा मानयन्ति ?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।

(ई) यथानिर्देशम् उत्तरत-

i) 'परम् अनेकतायाम् अपि एकताया: मधुरा धारा प्रवहति' अत्र 'मधुरा' इति कस्य विशेषणपदम् अस्ति ?

(क)भाषा (ख) धारा (ग) संस्कृतभाषा (घ) एकतायाः

(ii) 'अस्मिन् देशे सर्वे ऋतवः क्रमेण आगच्छन्ति ।' अत्र 'आगच्छन्ति' इति क्रियापदस्य किं कर्तृपदम् अस्ति ?

(क)अस्मिन् (ख) देशे (ग) ऋतवः (घ) सर्वे

(iii) अनुच्छेदे 'समानता' इति पदस्य किं विलोमपदं प्रयुक्तम् ?

(क)भाषा (ख) विविधता (ग) निहिता (घ) अज्ञानता

(iv) 'एकताया: मधुरा धारा प्रवहति' इत्यत्र किं क्रियापदम् प्रयुक्तम् ?

(क)एकताया: (ख) धारा (ग) प्रवहति (घ) मधुरा

प्रश्न: 2. स्वपाठ्यपुस्तकात् द्वितीय पाठात् समस्तश्लोकान् स्मरणं कृत्वा एकस्मिन् चार्ट पत्रे श्लोकाधारितं चित्रं रचयित्वा श्लोकं हिन्दी अर्थसहितं लिखत।

प्रश्न: 3. अधोलिखित- शब्दान् योजयित्वा दश नूतन वाक्यनिर्माणं कुर्वन्तु। यत् अत्र न सन्ति।

प्रश्न: 4.क्त्वा, ल्यप्, तुमुन् प्रत्यायानां योजयित्वा पाठ्य-पुस्तकात् तदाधारित प्रत्यायान्त-शब्दान् लिखन्तु।

प्रश्न: 5. प्रथम: पाठात् षष्ठपाठपर्यन्तं विषयपुस्तिकायां प्रश्नोत्ताणि अभ्यासकार्यं च लिखन्त।
प्रश्न: 6 स्वर-सन्धेः तपञ्चदश (15) उदाहरणानि अभ्यासपुस्तिकायां लिखतु।